योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०२६

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

इति ते वरवर्णिन्यौ ततो ब्रह्माण्डमण्डलात् ।

निर्गत्यान्यदनुप्राप्ते यत्र तद्ब्राह्मणास्पदम् ।। १

ततो ददृशतुः सद्म स्वमेवं सिद्धयोषितौ ।

अदृश्ये एव लोकस्य मण्डपं ब्राह्मणास्पदम् ।। २

चिन्ताविधुरदासीकं बाष्पक्लिन्नाङ्गनामुखम् ।

विध्वस्तप्रायवदनं शीर्णपर्णाम्बुजोपमम् ।। ३

नष्टोत्सवपुरप्रायमगस्त्यात्तमिवार्णवम् ।

ग्रीष्मदग्धमिवोद्यानं विद्युद्दग्धमिव द्रुमम् ।। ४

वातच्छिन्नमिवाम्भोदं हिमदग्धमिवाम्बुजम् ।

अल्पस्नेहदशं दीपमिवालोकनभेदनम् ।। ५

आसन्नमृत्युकरुणाकुलवक्त्रकान्ति-

संशीर्णजीर्णतरुपर्णवनोपमानम् ।

वृष्टिव्यपायपरिधूसरदेशरूक्षं

जातं गृहेश्वरवियोगहतं गृहं तत् ।। ६

श्रीवसिष्ठ उवाच ।

अथ सा निर्मलज्ञानचिराभ्यासेन सुन्दरी ।

संपन्ना सत्यसंकल्पा सत्यकामा च देववत् ।। ७

चिन्तयामास मामेते देवीं चेमां स्वबन्धवः ।

पश्यन्तु तावत्सामान्यललनारूपधारणीम् ।। ८

ततो गृहजनस्तत्र स ददर्शाङ्गनाद्वयम् ।
लक्ष्मीगौर्योर्युगमिव समुद्भासितमन्दिरम् ।। ९
आपादविविधाम्लानमालावसनसुन्दरम् ।
वसन्तलक्ष्म्योर्युगलमिवामोदितकाननम् ।। १०
सर्वौषधिवनग्रामं पूरयन्त्यौ रसायनैः ।
शीतलाह्लादसुखदं चन्द्रद्वयमिवोदितम् ।। ११
लम्बालकलतालोललोचनालिविलोकनैः ।
किरत्कुवलयोन्मिश्रमालतीकुसुमोत्करान् ।। १२
द्रुतहेमरसापूरसरित्सरणहारिणा ।
देहप्रभाप्रवाहेण कनकीकृतकाननम् ।। १३
सहजाया वपुर्लक्ष्म्या लीलादोलाविलासिनः ।
त एते च तरङ्गाढ्या निजलावण्यवारिधेः ।। १४
विलोलबाहुलतिकायुगेनारुणपाणिना ।
किरन्नवनवं हैमं कल्पवृक्षलतावनम् ।। १५
पादैरमृदिताम्लानपुष्पकोमलपल्लवैः ।
स्थलाब्जदलमालाभैरस्पृशद्भूतलं पुनः ।। १६
तालीतमालखण्डानां शुष्काणां शुचिशोचिषाम् ।
आलोकनामृतासेकैर्जनयद्बालपल्लवान् ।। १७
नमोऽस्तु वनदेवीभ्यामित्युक्त्वा कुसुमाञ्जलिम् ।
तत्याज ज्येष्ठशर्माथ सार्धं गृहजनेन सः ।। १८
पपात पादयोर्गेहे तयोर्वै कुसुमाञ्जलिः ।
प्रालेयसीकरासारः पद्मिन्या इव पद्मयोः ।। १९
ज्येष्ठशर्मादय ऊचुः ।
जयतं वनदेव्यौ नो दुःखनाशार्थमागते ।
प्रायः परपरित्राणमेव कर्म निजं सताम् ।। २०
इति तद्वचनान्ते ते देव्यावूचतुरादरात् ।

आख्यात दुःखं येनायं लक्ष्यते दुःखितो जनः ।। २१

ज्येष्ठशर्मादयस्ते ते देव्यौ प्रति यथाक्रमम् ।

निजं तद्दुःखमाचख्युर्दम्पतिव्यसनात्मकम् ।। २२

ज्येष्ठशर्मादय ऊचुः ।

देव्यावभवतां स्निग्धाविह ब्राह्मणदम्पती ।

सर्वातिथी कुलकरौ स्तम्भाभूतौ द्विजस्थितेः ।। २३

तावद्य गृहमुत्सृज्य सपुत्रपशुबान्धवम् ।

स्वर्गं गतौ नः पितरौ तेन शून्यं जगत्त्रयम् ।। २४

पक्षिणो गृहमारुह्य विक्षिपन्तः प्रतिक्षणम् ।

देहं शून्ये मृतं भक्त्या शोचन्ति मधुरैः स्वरैः ।। २५

गुहागुरुगुरारावप्रलापलपनाकुलः ।

सरित्स्थूलाश्रुधाराभिः परिरोदिति पर्वतः ।। २६

निर्जराक्रन्दकारिण्यो मुक्ताम्बरपयोधराः ।

तप्तनिःश्वासविध्वस्ताः परं कार्श्यमिता दिशः ।। २७

क्षतविक्षतसर्वाङ्गः करुणाक्रन्दकर्कशः ।

उपवासरतो ग्रामो दीनो मृतिपरः स्थितः ।। २८

दिवसं प्रति वृक्षाणामवश्यायाश्रुबिन्दवः ।

गुच्छलोचनकोशेभ्यस्तापोष्णानि पतन्त्यधः ।। २९

प्रशान्तजनसंचारा रथ्या क्षारविधूसरा ।

विधवाविगतानन्दा संशून्यहृदया स्थिता ।। ३०

कोकिलालिप्रलापिन्यो वृष्टिबाष्पहता लताः ।

उष्णोष्णश्वसना देहं घ्नन्ति पल्लवपाणिभिः ।। ३१

आत्मानं शतधा कर्तुं बृहच्छ्वभ्रशिलातले ।

निर्झराः प्रपतन्त्येते तापतप्तशरीरकाः ।। ३२

निःशङ्कया गतश्रीका मूका विलुलिताशयाः ।

अन्धेन तमसा पूर्णा गृहा गहनतां गताः ।। ३३

उद्यानपुष्पखण्डेभ्यो रुदद्भ्यो भ्रमरारवैः ।

पूतिगन्धो विनिर्याति स्वामोदापरनामकः ।। ३४

चैत्रद्रुमविलासिन्यो विरसाः प्रतिवासरम् ।

लताः कृशा विलीयन्ते सकुचद्गुच्छलोचनाः ।। ३५

प्रक्षेप्तुमम्बुधौ देहं प्रवृत्ता गन्तुमाकुलाः ।

कुल्याः कलकलालोलं दोलयन्त्यस्तनुं भुवि ।। ३६

अशङ्कमशकापातस्पन्दमप्यतिचापलम् ।

कलयन्त्यः स्थिता वाप्यो निस्पन्दानन्दमात्मनि ।। ३७

गायत्किन्नरगन्धर्वविद्याधरसुराङ्गनम् ।

नूनमद्य नभो जातमस्मत्ताताभ्यलंकृतम् ।। ३८

तद्देव्यौ क्रियतां तावदस्माकं शोकनाशनम् ।

महतां दर्शनं नाम न कदाचन निष्फलम् ।। ३९

इत्युक्तवन्तं सा पुत्रं मूर्ध्नि पस्पर्श पाणिना ।

पल्लवेनानता नम्रं मूलग्रन्थिमिवाब्जिनी ।। ४०

तस्याः स्पर्शेन तेनासौ दुःखदौर्भाग्यसंकटम् ।

जहौ प्रावृड्घनासङ्गाद्ग्रीष्मतापमिवाचलः ।। ४१

सर्वो गृहजनः सोऽथ तयोर्देव्योर्विलोकनात् ।

लक्ष्मीवान्दुःखनिर्मुक्तो बभूवामृतपो यथा ।। ४२

श्रीराम उवाच ।

तयास्य लीलया मात्रा पुत्रस्य ज्येष्ठशर्मणः ।

कस्मान्न दर्शनं दत्तं मोहं तावन्निराकुरु ।। ४३

श्रीवसिष्ठ उवाच ।

बुद्धः पृथ्व्यादिबोधेन येन पृथ्व्यादिसङ्घकः ।

तस्य पिण्डात्मतां धत्ते व्योमैवान्यस्य केवलम् ।। ४४

असदेवाङ्ग सदिव भाति पृथ्व्यादिवेदनात् ।

यथा बालस्य वेतालो नाभाति तदवेदनात् ।। ४५

यथा पृथ्व्यादिना भातमपृथ्व्यादि भवेत्क्षणात् ।

स्वप्ने स्वप्नपरिज्ञानात्तथा जाग्रत्यपि स्फुटम् ।। ४६

पृथ्व्यादि खतया बुद्धं खमित्येवानुभूयते ।

तथाहि क्षुब्धधातूनां कुड्येषु ख इवोद्यमः ।। ४७

स्वप्ने नगरमुर्वीं वा शून्यं खातं च बुध्यते ।

स्वप्नाङ्गना च कुरुते शून्याप्यर्थक्रियां नृणाम् ।। ४८

खं पृथ्व्यादितया बुद्धं पृथ्व्यादि भवति क्षणात् ।

मूर्च्छायां परलोकोऽपि प्रत्यक्षमनुभूयते ।। ४९

बालो व्योमैव वेतालं म्रियमाणोऽम्बरे वनम् ।

केशोण्ड्रकं खमन्यस्तु खमन्यो वेत्ति मौक्तिकम्।। ५०

त्रस्तक्षीबार्धनिद्राश्च नौयानाश्च सदैव स्ये ।

वेतालवनवृक्षादि पश्यन्त्यनुभवन्ति च ।। ५१

यथाभावितमेतेषां पदार्थानामतो वपुः ।

अभ्यासजनितं भाति नास्त्येकं परमार्थतः ।। ५२

लीलया तु यथावस्तु बुद्ध्वा पृथ्व्यादिनास्तिता ।

आकाशमेव संवित्त्या भाति भ्रान्तितयोदितम् ।। ५३

ब्रह्मात्मैकचिदाकाशमात्रबोधवतो मुनेः ।

पुत्रमित्रकलत्राणि कथं कानि कदा कुतः ।। ५४

दृश्यमादावनुत्पन्नं यच्च भात्यजमेव तत् ।

सम्यग्ज्ञानवतामेव रागद्वेषदृशो कृतः ।। ५५

हस्तः शिरसि यद्दत्तो लीलया ज्येष्ठशर्मणः ।

तत्प्रभावस्थितारम्भसंबोधायाश्रितेः फलम् ।। ५६

बोधो हि चेतति यथैव तथा शुभानि

सूक्ष्मस्तु खादपि तथातितरां विशुद्धः ।

सर्वत्र राघव स एव पदार्थजालं

स्वप्नेषु कल्पितपुरेष्वनुभूतमेतत् ।। ५७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलोपाख्याने सिद्धदर्शनहेतुकथनं नाम षड्विंशः सर्गः

।। २६ ।।